# Annapurna Stava

# અન્નપૂર્ણાસ્તવઃ

## Document Information

Text title : Annapurna Stava

File name : annapUrNAstavaH.itx

Category : devii, devI, pArvatI, annapUrNA

Location : doc_devii

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 2 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# અન્નપૂર્ણાસ્તવઃ

વિશ્વેશ્વરીં વરેણ્યાં વિશ્વાશ્રયણીં વિશિષ્ટફલદાત્રીમ્ ।
સ્તોષ્યામિ વાઞ્છિતાપ્ત્યૈ સ્તોત્રૈરન્નાધિનાયિકામમ્બામ્ ॥ ૧॥

કાઞ્ચનરત્નવિચિત્રાં દર્વીં દધતીં તથાન્નપાત્રં ચ ।
કષ્ટદરિદ્રાર્તિહરામમ્બાં પ્રણતોઽસ્મિ સમ્પદાં વૃદ્ધ્યૈ ॥ ૨॥

સર્વાભિલાષપૂરણકલ્પકલતિકાન્નપૂર્ણાખ્યા ।
દારિદ્ર્યદોષમુગ્રં શમયતુ સકલાર્થવૃદ્ધિદાનેન ॥ ૩॥

અન્નાધિનાયિકાયાઃ કૃપાઘના દુઃખધર્મપરિતપ્તે ।
મયિ દારિદ્ર્યકૃશાઙ્ગ્યા વર્ષતુ ધનધાન્યધારયા સુચિરમ્ ॥ ૪॥

વેદાદિર્ભુવનાહૃદ્ભગવતિ માહેશ્વરીતિ ચાન્નાન્તે ।
પૂર્ણેઽગ્નિવલ્લભા સ્યાદુક્તોઽયં મનુરશેષફલદાયી ॥ ૫॥

ગુરુકારુણ્યાલ્લબ્ધં મન્ત્રમિદં દિનમુખેષુ ભક્તધિયા ।
યો જપતિ તસ્ય સિદ્ધિર્ન દુર્લભા જાયતે ચ તાપઘ્ની ॥ ૬॥

તવ પાદકમલસેવાહૃતચિત્તઃ સાધકઃ સમાહિતધીઃ ।
તરતિ મહાભવદુર્ગં વિશ્રુતકીર્તિપ્રભાવસૌભાગ્યઃ ॥ ૭॥

ત્વજ્જપપૂજાધ્યાનપ્રભેદપરિનિષ્ઠિતાત્મધીર્મનુજઃ ।
નિઃસ્વોઽપ્યકિઞ્ચનોઽપિ ત્રિભુવનવિખ્યાતકીર્તિરાશિઃ સ્યાત્ ॥ ૮॥

નિધિવૃન્દમધ્યગાં ત્વાં ધ્યાત્વા મન્ત્રં યદા નરો જપતિ ।
દેવિ તદાસ્ય નિવાસં વિશન્તિ વિવિધાર્થપૂરિતા નિધયઃ ॥ ૯॥

દિવ્યાન્નપૂર્ણપાત્રં દર્વીં ચ કરદ્વયેન બિભ્રાણામ્ ।
ધ્યાત્વા યદિ જપતિ ત્વાં પ્રપૂર્યતે તસ્ય વેશ્મ ધાન્યૌઘૈઃ ॥ ૧૦॥

યસ્મિન્ વસતિ મનુષ્યસ્તવ મન્ત્રવિશેષજાપકો દેશે ।
તત્ર ન દીના વાણી પ્રવર્તતે દેવિ “નાસ્તિ નાસ્તી” તિ ॥ ૧૧॥

અન્નાદ્રિમધ્યવિસ્ફુરદમ્બુજમધ્યે ત્રિમણ્ડલાન્તઃસ્થામ્ ।
ધ્યાયેદ્યો દારિદ્ર્યાદ્વિમુચ્યતે સાધકઃ સ એવાશુ ॥ ૧૨॥

ઇન્દ્રાગ્નિસોમભાસ્કરવરુણાનિલધનદતાર્ક્ષ્યકન્દર્પાઃ ।
વિષ્ણુવિરિશ્ચિપ્રમુખા દેવાસ્ત્વદ્ધ્યાનસમ્પદા પ્રથિતાઃ ॥ ૧૩॥

યુષ્મદપાઙ્ગઘનોઽયં પ્રશમિતબહુદુઃખધર્મતાપૌઘઃ ।
ધારાસારવનૌઘં વર્ષતુ મયિ દેવિ સર્વદા કૃપયા ॥ ૧૪॥

તત્ર પાણિવલ્લવસ્થા દર્વી દિવ્યાન્નપૂરિતા દેવિ ।
દારિદ્ર્યદોષમુગ્રં શમયતુ મમ સમ્પદાં વૃદ્ધ્યૈ ॥ ૧૫॥

વીક્ષસ્વ મામનેકામયદુરિતદુરન્તદુઃખપરિતપ્તમ્ । (પરિતપ્તામ્)
માતર્વિભૂતિમય્યા દિવ્યામૃતસારધારયા દૃષ્ટ્યા ॥ ૧૬॥

અભિનવભાસ્કરકોટિપ્રભાસમુદ્ભાસિતં હિ તે રૂપમ્ ।
હૃદયામ્બુજમધ્યગતં દેવિ સમાધૌ ભજન્તિ યોગીન્દ્રાઃ ॥ ૧૭॥

આદૌ સૃજસિ ચ વિશ્વં પ્રપાસિ સચરાચરં જગદ્ ભૃયઃ ।
સંહરસિ લોકમન્તે ગુણત્રયે સા ત્વમેવ દેવ્યેકા ॥ ૧૮॥

માયોદધિરયમમ્બ વિષયગ્રાહોર્મિન્દારુણો ભવતિ ।
ત્વત્તાપવાડવાગ્નૌ સોઽપિ ચ વિલયં પ્રયાતિ તચ્ચિત્રમ્ ॥ ૧૯॥

શ્રીમદ્ગુરુપ્રસાદાત્તત્ત્વં તવ યોઽભિવેત્તિ લોકેઽસ્મિન્ ।
દેવિ સ મનુજો લોકે પારત્રિકમૈહિકં શમભ્યેતિ ॥ ૨૦॥

હુતભુઙ્મણ્ડલમધ્યે વિલસિતરવિબિમ્બમધ્યગં ત્વમૃતમ્ ।
સોમાત્મકં વિદિત્વા દેવિ ત્વદ્ભાવનેન પૂતઃ સ્યાત્ ॥ ૨૧॥

ગુરુવરપાદપવિત્રીકૃતાન્તરાત્મા પ્રતાપયિત્વા ત્વામ્ ।
દેવિ ચિદગ્નૌ દીપ્તે યોગી યોગામૃતં જુહોત્યેવ ॥ ૨૨॥

સકૃદપિ યુષ્મદ્ભક્તો દિવ્યામૃતમમ્બ ભાવપાત્રસ્થમ્ ।
પિબતિ વિદિત્વા સમ્યગ્ જીવન્મુક્તઃ સ વિજ્ઞેયઃ ॥ ૨૩॥

યોગામૃતપૂતાત્મા યોગી વિજિતેન્દ્રિયારિજિતસઙ્ગઃ । (સઙ્ઘઃ)
નહિ જનનીગર્ભગૃહં પ્રવિશતિ યોગેશિ યોગભાવિતધીઃ ॥ ૨૪॥

યોગી ત્વયાહિધત્તે સંવિત્તિપદે તદૈવ પરિતુષ્ટિમ્ । (ત્વયાધિધત્તે)
વિધિહરિરુદ્રાદીનાં ગણયતિ ન પદાનિ દેવ્યનિત્યાનિ ॥ ૨૫॥

ષટ્ત્રિંશત્તત્ત્વાખ્યં શિવાદિભૂમ્યન્તમમ્બ વિશ્વમિદમ્ ।
યસ્યોર્મિમ્બુદ્બુદઃ સ્યાત્ તત્તે સંવિત્તિમાશ્રયે ધામ ॥ ૨૬॥

મૂલાધારનિવાસા સૂક્ષ્મા સૂર્યાયુતોપમા શક્તિઃ ।
નિર્ભિદ્ય ષટ્સરોજં યાન્તી યા સા ત્વમેવ શમ્ભુપદમ્ ॥ ૨૭॥

ષોડશપત્રસરોજાત્ સ્રવન્મહાધારયા સહોદ્દીપ્તા ।
યાન્તી મૂલનિવાસં યા હિ કુળા કુણ્ડલી ત્વમેવામ્બ ॥ ૨૮॥

જિત્વા ષટ્ પઞ્ચ પુનર્નિરુધ્ય દશકં તથૈકમવલમ્બ્ય ।
દેવિ તવ રૂપમબ્જે હૃદયસ્થે સંયમી સ્મરતિ ॥ ૨૯॥

સ્થૂલં તવામ્બ રૂપં યોગિમનઃપદ્મકર્ણિકાસંસ્થમ્ ।
યોગવિવૃદ્ધ્યૈ સિદ્ધિં મમ દિશતુ સમસ્તવાઞ્છિતાવાપ્ત્યૈ ॥ ૩૦॥

સૂક્ષ્મં તવામ્બ રૂપં સકલજગત્રાણકારણોદ્ભૂતમ્ ।
સ્તોષ્યે તદેવ ભક્ત્યા વાઞ્છિતસિદ્ધિપ્રદાનસુરવૃક્ષમ્ ॥ ૩૧॥

શ્રીદુર્ગા વાગ્દેવી ગિરિજા લિપિમાતૃકા ચ માતઙ્ગી ।
ત્રિપુરા તથાન્નપૂર્ણા રાજ્યા રમા ચેતિ કીર્તિતા મુનિભિઃ ॥ ૩૨॥

વાગ્દેવીં વાગાપ્ત્યૈ દુર્ગાં ભયશાન્તયે શ્રિયં ભૂત્યૈ ।
આરાધયતિ મનુષ્યઃ પુરુષાર્થચતુષ્કલબ્ધયે ત્રિપુરામ ॥ ૩૩॥

બહુરૂપધારિણીં ત્વાં બહુધા પ્રવદન્તિ માનવા લોકે ।
ગુરુમન્ત્રદેવતાત્મસ્વરૂપિણીં ભાવયામ્યહં ત્વેકામ્ ॥ ૩૪॥

કથમમ્બ રૂપમાદ્યં તવ રૂપગુણાધિકં ચ ચિન્માત્રમ્ ।
જાનામિ દેવિ તસ્માદ્ દુરુક્તમીશિ ક્ષમસ્વ તત્ સર્વમ્ ॥ ૩૫॥

દારિદ્ર્યદુરિતદુઃખપ્રશાન્તયે વ્યાહૃતં મયા સ્તોત્રમ્ ।
દેવિ સદા તં જપતાં ભક્તાનાં ભવતુ કામધેનુરિદમ્ ॥ ૩૬॥

સ્તોત્રેણ ત્વં તુષ્ટા મયોદિતેન પ્રભૂતધનધાન્યૈઃ !
પૂરય વેશ્મ મદીયં વિધેહિ મયિ સન્નિધિં પ્રપદ્યે ત્વામ્ ॥ ૩૭॥

ઇતિ અન્નપૂર્ણાસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Mohan Chettoor

*Annapurna Stava*

pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*